THE NEW SANSCRIT PRIMER

(with nice wood-cuts)

PART I.

गीर्वाणभाषोद्यानप्रवेशिकानाम

सचित्र संस्कृत बालशिक्षा

[प्रथमो भागः]

रामतत्त्वप्रकाश छापखाना.
बेळगांव.

1899.

Price 2½ annas.

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

1615-36 The Bangalore Press

THE NEW

SANSCRIT PRIMER.

(with nice wood-cuts)

PART I.

Containing *Kanarese*, *Telugu* & *English* alphabet equivalant to *Devanagari* alphabet

AND

advisory lessons with other necessary information.

गीर्वाणभाषोद्यानप्रवेशिकानाम
सचित्र संस्कृत बालशिक्षा ।

[प्रथमो भागः]

Printed and published by

ABAJI RAMCHANDRA SAVANT.

Proprietor the " Ramtatva-Prakash Press "

BELGAUM.

1899.

Price $2\frac{1}{2}$ Annas.

विज्ञप्तिः ।

श्लोक (शार्दुलविक्रीडित.)

नास्तन्या जनचित्तमोहनकरी गीर्वाण भाषा समा
वर्तन्ते खलु यत्र सर्वसुखदा विद्याश्च नानाविधाः ।
यां वै संप्रति ते भजन्ति च परद्वीपस्थ लोकास्त्वहो
तामार्या वयमद्य मातुराधिकं किं नो नु सेवामहे ॥१॥

(अनुष्टुम्)

सुदैवेनांग्लसत्तायां प्रसारोऽत्र महानभूत् ॥
अस्याः संस्कृत भाषाया जीर्णतां या गता पुरा ॥२॥
' बालशिक्षा ' पुस्तकेऽस्मिन्नपूर्वक्रमपूर्वकम् ॥
यत्नतो निहिताः पाठा ज्ञानवृद्धिकराः खलु ॥ ३ ॥
व्यावहारिक विज्ञानं तूर्णं वर्धिष्यते यया ॥
भाषाज्ञानं च बालानां रीतिः सैवावलंबिता ॥ ४ ॥
इच्छूनां परिचेतुं च देवभाषां सुमंगलां ॥
हंसक्षीराख्य न्यायेन तुष्टिं प्राप्नोतु सर्वदा ॥ ५ ॥

THE NEW

SANSCRIT PRIMER.

(with nice wood-cuts).

PART I.

Containing *Kanarese, Telugu &*
English alphabet equivalent
to *Devanagari* alphabet

AND

advisory lessons with other necessary
information.

गीर्वाणभाषोद्यानप्रवेशिकानाम सचित्र संस्कृत बालशिक्षा ।

[प्रथमो भागः]

Printed and published by

ABAJI RAMCHANDRA SAVANT.

Proprietor the " Ramtatva-Prakash Press "

BELGAUM.

1899.

Price $2\frac{1}{2}$ Annas.

विज्ञप्तिः ।

श्लोक (शार्दुलविक्रीडित.)

नास्त्यन्या जनचित्तमोहनकरी गीर्वाण भाषा समा
वर्तन्ते खलु यत्र सर्वसुखदा विद्याश्च नानाविधाः ।
यां वै संप्रति ते भजन्ति च परद्वीपस्थ लोकास्त्वहो
तामार्या वयमद्य मातुराधिकं किं नो नु सेवामहै ॥१॥

(अनुष्टुम्)

सुदैवेनांग्लसत्तायां प्रसारोऽत्र महानभूत् ॥
अस्याः संस्कृत भाषाया जीर्णतां या गता पुरा ॥२॥
'बालशिक्षा' पुस्तकेऽस्मिन्नपूर्वक्रमपूर्वकम् ॥
यत्नतो निहिताः पाठा ज्ञानवृद्धिकराः खलु ॥ ३ ॥
व्यावहारिक विज्ञानं तूर्णं वर्धिष्यते यया ॥
भाषाज्ञानं च बालानां रीतिः सैवावलंबिता ॥ ४ ॥
इच्छूनां परिचेतुं च देवभाषां सुमंगलां ॥
हंसक्षीराख्य न्यायेन तुष्टिं प्राप्नोतु सर्वदा ॥ ५ ॥


अनन्तः



आदित्यः



इन्दुः



ईश्वरः



उन्दुरः



ऊर्णनाभः



ऋषभः 

ऋ ऋ

ऌ ऌ

ॡ ॡ

एणः 

ऐरावतः 

ओतुः



औदुंबरः



अंकुशः




अः

अः

कमलम्



खड्गः




गजाननः



घण्टा




ङ



चक्रम्



छत्रम्




जरठः



झषः



ञ



टट्टनी




ठक्करः



डमरुः



ढक्का



ण ण

तरणिः



थ थ

दत्तात्रेयः




धनुः



नक्रः



पट्टिशः



फलकः



बटुः




भल्लूकः



मयूरः



यज्ञः



रथः



लक्ष्मीः



वराहः




शशः



षडाननः



सर्पः





हनूमान्



क्षत्रियः

क्ष क्ष

बालबोध.	कन्नड.	तेलगु.	इंग्लिश.
अ	ಅ	అ	*a*
आ	ಆ	ఆ	*â*
इ	ಇ	ఇ	*i*
ई	ಈ	ఈ	*î*
उ	ಉ	ఉ	*u*
ऊ	ಊ	ఊ	*û*

ऋ	ಋ	ఋ	*ṛi*
ॠ	ೠ	ౠ	*ṛî*
ऌ	ಌ	ఌ	*ḷi*
ॡ	ೡ	ౡ	*ḷî*
ए	ಎ	ఎ	*e*
	ಏ	ఏ	
ऐ	ಐ	ఐ	*ai*
ओ	ಒ	ఒ	*o*
	ಓ	ఓ	
औ	ಔ	ఔ	*au*
अं	ಅಂ	అం	*am*
अः	ಅಃ	అః	*ah*
क	ಕ	క	*k*
ख	ಖ	ఖ	*kh*
ग	ಗ	గ	*g*
घ	ಘ	ఘ	*gh*

ङ	ಙ	ఙ	*ṅ*
च	ಚ	చ	*ch*
छ	ಛ	ఛ	*chh*
ज	ಜ	జ	*j*
झ	ಝ	ఝ	*jh*
ञ	ಞ	ఞ	*ñ*
ट	ಟ	ట	*ṭ*
ठ	ಠ	ఠ	*ṭh*
ड	ಡ	డ	*ḍ*
ढ	ಢ	ఢ	*ḍh*
ण	ಣ	ణ	*ṇ*
त	ತ	త	*t*
थ	ಥ	థ	*th*
द	ದ	ద	*d*
ध	ಧ	ధ	*dh*
न	ನ	న	*n*

प	ಪ	ప	*p*
फ	ಫ	ఫ	*ph*
ब	ಬ	బ	*b*
भ	ಭ	భ	*bh*
म	ಮ	మ	*m*
य	ಯ	య	*y*
र	ರ	ర	*r*
ल	ಲ	ల	*l*
व	ವ	వ	*v*
श	ಶ	శ	*ś*
ष	ಷ	ష	*sh*
स	ಸ	స	*s*
ह	ಹ	హ	*h*
ळ	ಳ	ళ	*ḷ*
क्ष	ಕ್ಷ	క్ష	*ksh*
ज्ञ.	ಜ್ಞ	జ్ఞ	*jñ*



॥ श्री गणेशाय नमः ॥

॥ ॐ नमः सिद्धं ॥

स्वराः ।

अ आ इ ई

उ ऊ ऋ ॠ

ऌ ए ऐ ओ

औ अं अः

व्यञ्जनानि ।

क ख ग घ ङ

च छ ज झ ञ

ट ठ ड ढ ण

त थ द ध न

प फ ब भ म

य र ल व

श ष स ह

ळ क्ष ज्ञ.

o oo ooo oooo ooooo

१ २ ३ ४ ५

oooooo ooooooo oooooooo

६ ७ ८

ooooooooo oooooooooo

९ १०

अज	इभ	ऋण	एक
ऐण	कर	खग	गज
घट	चल	छल	जप
झष	डह	तट	शठ
रथ	दक्ष	धन	रण
फल	बल	भर	मठ
यज्ञ	पट	नद	ईश

ईक्षण	उपल	ऊषण
ओदन	औषध	अंसल
आढक	जनक	तक्षक
चपल	पणव	जठर
हलधर	आचमन	उपवन

केवल व्यञ्जनरेखा ।

क् च् ट् त् प् ल् श् ष् स् ह् व् घ् न्


व्यञ्जनानांस्वरसंयोगक्रमः ।

क् + अ = क	क् + ई = की	क् + ए = के	क् + औ = कौ
क् आ = का	क् उ = कु	क् ऐ = कै	क् अं = कं
क् इ = कि	क् ऊ = कू	क् ओ = को	क् अः = कः

अ आ इ ई उ ऊ ए ऐ ओ औ अं अः

— ा ि ी ु ू े ै ो ौ ं ः

क	का	कि	की	कु	कू	के	कै	को	कौ	कं	कः
ಕ	ಕಾ	ಕಿ	ಕೀ	ಕು	ಕೂ	ಕೆ	ಕೈ	ಕೊ	ಕೌ	ಕಂ	ಕಃ
ka	*kâ*	*ki*	*kî*	*ku*	*kû*	*ke*	*kai*	*ko*	*kau*	*kam*	*kah*
ख	खा	खि	खी	खु	खू	खे	खै	खो	खौ	खं	खः
ग	गा	गि	गी	गु	गू	गे	गै	गो	गौ	गं	गः
घ	घा	घि	घी	घु	घू	घे	घै	घो	घौ	घं	घः
ङ	ङा	ङि	ङी	ङु	ङू	ङे	ङै	ङो	ङौ	ङं	ङः
च	चा	चि	ची	चु	चू	चे	चै	चो	चौ	चं	चः
छ	छा	छि	छी	छु	छू	छे	छै	छो	छौ	छं	छः



[illegible]

भ	भा	भि	भी	भु	भू	भे	भै	भो	भौ	भं	भः
म	मा	मि	मी	मु	मू	मे	मै	मो	मौ	मं	मः
य	या	यि	यी	यु	यू	ये	यै	यो	यौ	यं	यः
र	रा	रि	री	रु	रू	रे	रै	रो	रौ	रं	रः
ल	ला	लि	ली	लु	लू	ले	लै	लो	लौ	लं	लः
व	वा	वि	वी	वु	वू	वे	वै	वो	वौ	वं	वः
श	शा	शि	शी	शु	शू	शे	शै	शो	शौ	शं	शः
ष	षा	षि	षी	षु	षू	षे	षै	षो	षौ	षं	षः

स	सा	सि	सी	सु	सू	से	सै	सो	सौ	सं	सः
ह	हा	हि	ही	हु	हू	हे	है	हो	हौ	हं	हः
ळ	ळा	ळि	ळी	ळु	ळू	ळे	ळै	ळो	ळौ	ळं	ळः
क्ष	क्षा	क्षि	क्षी	क्षु	क्षू	क्षे	क्षै	क्षो	क्षौ	क्षं	क्षः
ज्ञ	ज्ञा	ज्ञि	ज्ञी	ज्ञु	ज्ञू	ज्ञे	ज्ञै	ज्ञो	ज्ञौ	ज्ञं	ज्ञः

१, २, ३, ४, ५, ६, ७, ८, ९, १०,

೧ ೨ ೩ ೪ ೫ ೬ ೭ ೮ ೯ ೧೦

1, 2, 3, 4, 5, 6, 7, 8, 9, 10,

गंगा तापः जंघा दंडी
पांसु वामा तैलं वैरं
छंदः रामः डिंभः वीणा
इंदिरा आकाशः उशीरं
कालिंगः केतकी गौतमी
पांचाली तितिक्षा तुरंगः
पानीयं भावना माकंदः
मुकुंदः गोविंदः अशोकः
वासंती शोभनः संसारः
हेमंतः सुधांशुः सौरभः
सुमेधाः सैंधवी वैखरी
औदुंबरः कादंबिनी धारांकुरः
यजमानः यावनालः राजहंसः
आभितपाः दिवौकसः चंपावती

संयुक्त व्यञ्जनानि ।

क्क(क्+क)	क्ख(क्ख)	क्च(क्च)
क्त(क्त)	क्थ(क्थ)	क्न, क्न(क्न)
क्म(क्म)	क्य(क्य)	क्र, क्र(क्र)
क्ल क्ल(क्ल)	क्व(क्व)	क्ष(क्ष)
ख्न(ख्न)	ख्य(ख्य)	ख्र(ख्र)
ख्व(ख्व)	ग्ग(ग्ग)	ग्घ(ग्घ)
ग्ज(ग्ज)	ग्ण(ग्ण)	ग्द(ग्द)
ग्ध(ग्ध)	ग्न(ग्न)	ग्ब(ग्ब)
ग्भ(ग्भ)	ग्म(ग्म)	ग्य(ग्य)
ग्र(ग्र)	ग्ल(ग्ल)	ग्व(ग्व)
घ्न(घ्न)	घ्य(घ्य)	घ्र(घ्र)
घ्व(घ्व)	ङ्क(ङ्क)	ङ्घ(ङ्घ)
ङ्म(ङ्म)	ङ्न(ङ्न)	च्च(च्च)
च्छ(च्छ)	च्म(च्म)	च्य(च्य)

च्र (च्‌र)	च्व (च्‌व)	छ्य (छ्‌य)
छ्र (छ्‌र)	ज्ज (ज्‌ज)	ज्म (ज्‌म)
ज्र (ज्‌र)	ज्य (ज्‌य)	ज्व (ज्‌व)
झ्य (झ्‌य)	ञ्च (ञ्‌च)	ट्क (ट्‌क)
ट्ट (ट्‌ट)	ट्य (ट्‌य)	ट्र (ट्‌र)
ट्व (ट्‌व)	ठ्य (ठ्‌य)	ठ्र (ठ्‌र)
ड्ग (ड्‌ग)	ड्ड (ड्‌ड)	ड्य (ड्‌य)
ड्र (ड्‌र)	ड्व (ड्‌व)	ढ्य (ढ्‌य)
ढ्र (ढ्‌र)	ढ्व (ढ्‌व)	ण्ट (ण्‌ट)
ण्ड (ण्‌ड)	ण्ण (ण्‌ण)	ण्म (ण्‌म)
ण्य (ण्‌य)	ण्व (ण्‌व)	ण्ह (ण्‌ह)
त्क (त्‌क)	त्ख (त्‌ख)	त्त (त्‌त)
त्थ (त्‌थ)	त्न (त्‌न)	त्प (त्‌प)
त्फ (त्‌फ)	त्म (त्‌म)	त्य (त्‌य)
त्र, त्र (त्‌र)	त्व (त्‌व)	त्स (त्‌स)
त्क्ष (त्‌क्ष)	ज्ञ (त्‌[ज]ञ)	थ्न (थ्‌न)

थ्म(थ्‌म)	थ्य(थ्‌य)	थ्र(थ्‌र)
द्ग(द्‌ग)	द्घ(द्‌घ)	द्द(द्‌द)
द्ध(द्‌ध)	द्न(द्‌न)	द्ब(द्‌ब)
द्भ(द्‌भ)	द्म(द्‌म)	द्य(द्‌य)
द्र(द्‌र)	द्व(द्‌व)	ध्न(ध्‌न)
ध्म(ध्‌म)	ध्य(ध्‌य)	ध्र(ध्‌र)
ध्व(ध्‌व)	न्क(न्‌क)	न्त(न्‌त)
न्थ(न्‌थ)	न्द(न्‌द)	न्ध(न्‌ध)
न्न(न्‌न)	न्प(न्‌प)	न्म(न्‌म)
न्य(न्‌य)	न्र(न्‌र)	न्व(न्‌व)
न्ह(न्‌ह)	प्न(प्‌न)	प्त(प्‌त)
प्प(प्‌प)	प्म(प्‌म)	प्य(प्‌य)
प्र(प्‌र)	प्ल,प्ल(प्‌ल)	प्व(प्‌व)
प्स(प्‌स)	फ्य(फ्‌य)	फ्र(फ्‌र)
फ्ल(फ्‌ल)	ब्य(ब्‌य)	ब्ग(ब्‌ग)
ब्घ(ब्‌घ)	ब्ज(ब्‌ज)	ब्द(ब्‌द)

ब्ध(ब्‌ध)	ब्न(ब्‌न)	ब्ब(ब्‌ब)
ब्र(ब्‌र)	ब्ल(ब्‌ल)	ब्ज्ञ(ब्‌ज्ञ)
भ्न(भ्‌न)	भ्य(भ्‌य)	भ्र(भ्‌र)
भ्व(भ्‌व)	म्न(म्‌न)	म्प(म्‌प)
म्फ(म्‌फ)	म्ब(म्‌ब)	म्भ(म्‌भ)
म्म(म्‌म)	म्य(म्‌य)	म्र(म्‌र)
म्ल(म्‌ल)	म्ण(म्‌ण)	य्य(य्‌य)
य्व(य्‌व)	र्क(रक)	र्च(रच)
र्ण(रण)	र्त(रत)	र्म(रम)
र्र(रर)	र्ह(रह)	ऱ्ह(रह)
ल्क(ल्‌क)	ल्ग(ल्‌ग)	श्न(श्‌न)
ल्प(ल्‌प)	ल्ब(ल्‌ब)	ल्म(ल्‌म)
ल्य(ल्‌य)	ल्ल(ल्‌ल)	ल्व(ल्‌व)
ल्ह(ल्‌ह)	व्न(व्‌न)	व्य(व्‌य)
व्र(व्‌र)	व्व(व्‌व)	श्च(श्‌च)
श्म(श्‌म)	श्य(श्‌य)	श्र(श्‌र)

श्ल(श्‌ल)	श्व(श्‌व)	श्श(श्‌श)
ष्क(ष्‌क)	ष्ट(ष्‌ट)	ष्ठ(ष्‌ठ)
ष्ण(ष्‌ण)	ष्प(ष्‌प)	ष्म(ष्‌म)
ष्य(ष्‌य)	ष्व(ष्‌व)	स्क(स्‌क)
स्ख(स्‌ख)	स्त(स्‌त)	स्थ(स्‌थ)
स्न(स्‌न)	स्प(स्‌प)	स्फ(स्‌फ)
स्म(स्‌म)	स्य(स्‌य)	स्र(स्‌र)
स्ल(स्‌ल)	स्स(स्‌स)	ह्न(ह्‌न)
ह्ण(ह्‌ण)	ह्म(ह्‌म)	ह्य(ह्‌य)
ह्र(ह्‌र)	ह्व(ह्‌व)	ह्ळ(ह्‌ळ)
ळ्व(ळ्‌व)	ळ्ळ(ळ्‌ळ)	क्ष्ण(क्ष्‌ण)
क्ष्म(क्ष्‌म)	क्ष्य(क्ष्‌य)	क्ष्व(क्ष्‌व)
क्त्र(क्‌त्‌र)	ग्र्य(ग्‌रय)	च्छ्व(च्‌छ्‌व)
च्छ्र(च्‌छ्‌र)	र्त्म(रत्‌म)	र्त्य(रत्‌य)
र्ण्य(रण्‌य)	त्प्र(त्‌प्‌र)	त्र्य(त्‌रय)
त्त्र(त्‌त्‌र)	त्स्न(त्‌स्‌न)	त्स्य(त्‌स्‌य)

द्ब्र(द्ब्र्) द्र्य(द्र्य) द्व्र(द्व्र)
द्व्य(द्व्य) र्ध्व(र्ध्व) प्त्य(प्त्य)
ष्क्र(ष्क्र) ष्ट्य(ष्ट्य) ष्ट्र(ष्ट्र)
ष्ट्व(ष्ट्व) ष्ठ्य(ष्ठ्य) ष्प्र(ष्प्र)
स्पृ(स्पृ) स्प्र(स्प्र) त्म्य(त्म्य)
द्म्य(द्म्य) द्द्व(द्द्व) स्त्र(स्त्र)
क्त्व(क्त्व) ग्ध्र(ग्ध्र) ग्ध्व(ग्ध्व)
च्व्य(च्व्य) ण्ठ्य(ण्ठ्य) न्द्र(न्द्र)
र्व्य(र्व्य) न्त्य(न्त्य) ध्व्य(ध्व्य)
म्प्र(म्प्र) म्प्य(म्प्य) श्श्र(श्श्र)
स्त्र्य(स्त्र्य) ह्म्य(ह्म्य) व्ह्य(व्ह्य)
क्र्य(क्र्य) प्त्र(प्त्र) ङ्क्ष्व(ङ्क्ष्व)
र्ह्य(र्ह्य) स्म्य(स्म्य) क्ष्म्य(क्ष्म्य)
च्म्य(च्म्य) श्च्य(श्च्य)
र्ष्ण्य(र्ष्ण्य) ल्भ्य(ल्भ्य)
ङ्ग्ध्व(ङ्ग्ध्व) र्त्स्न्य(र्त्स्न्य)

क्र	क्रा	क्रि	क्री	क्रु	क्रू	क्रे	क्रै	क्रो	क्रौ	क्रं	क्रः
त्र	त्रा	त्रि	त्री	त्रु	त्रू	त्रे	त्रै	त्रो	त्रौ	त्रं	त्रः
द्र	द्रा	द्रि	द्री	द्रु	द्रू	द्रे	द्रै	द्रो	द्रौ	द्रं	द्रः
म्र	म्रा	म्रि	म्री	म्रु	म्रू	म्रे	म्रै	म्रो	म्रौ	म्रं	म्रः
ष्ट	ष्टा	ष्टि	ष्टी	ष्टु	ष्टू	ष्टे	ष्टै	ष्टो	ष्टौ	ष्टं	ष्टः
ष्ट्र	ष्ट्रा	ष्ट्रि	ष्ट्री	ष्ट्रु	ष्ट्रू	ष्ट्रे	ष्ट्रै	ष्ट्रो	ष्ट्रौ	ष्ट्रं	ष्ट्रः

ऋकारयुक्तव्यञ्जनानि ।

कृ(क्ऋ) चृ(चऋ) छृ(छ्ऋ) तृ(त्ऋ)
दृ(द्ऋ) नृ(नृऋ) पृ(प्ऋ) बृ(ब्ऋ)
मृ(म्ऋ) वृ(वृऋ) शृ(श्ऋ) हृ(ह्ऋ)

कृष्णा तृष्णा दृष्टिः वृष्टिः
नृपालः शृगालः मृणालः
पृथ्वीका बृहस्पतिः हृष्टरोमा

शब्दपाठः

चक्र तक्र नक्र वक्र
अत्र तत्र छत्र सत्र
खण्ड चण्ड दण्ड मण्ड
ऊर्ण कर्ण पर्ण वर्ण
कर्म धर्म मर्म वर्म
कुष्ट दुष्ट पुष्ट सुष्ट
प्रेष्ठः श्रेष्ठः ज्येष्ठः स्फेष्ठः
वृषोक्षः सन्नद्धः प्रल्हन्नः पद्माक्षी



॥ श्लोकाः ॥

गजाननं भूतगणाधिसेवितं
कपित्थ जंबू फल सार भक्षितं
उमासुतं शोकविनाशकारणं
नमामि विघ्नेश्वरपादपङ्कजम् ॥ १ ॥

नमस्ते शारदा देवि काश्मीरपुरवासिनी
त्वामहं प्रार्थये देवि विद्यादानं च देहिमे॥ २॥
पाशांकुशधरा देवि वीणापुस्तकधारिणि
मम वक्रे वसेन्नित्यं दुग्धकुंद सुनिर्मले ॥ ३॥
सरस्वति नमस्तुभ्यं वरदे कामरूपिणि
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ४
गणनाथसरस्वतीरविशुक्रबृहस्पतीन्
पंचैतान्संस्मरेन्नित्यं वेदवाणी प्रवर्तते ॥ ५॥

प्रथमः पाठः ॥ १ ॥

(शब्दाः)

श्रीः	धीः	ह्रीः	गीः
गौः	नौः	भूः	भाः
अन्नं	जलं	दुग्धं	दधि
मधु	घृतं	तक्रं	तैलं
सत्यं	पुण्यं	धर्मः	गुरुः
शब्दः	हितं	गेहं	वैरं
पत्रं	वेदः	देवं	व्रतं

भुङ्क्ष्व	वद	भज	विश
कुरु	चर	त्यज	लिख
पठ	ब्रूहि	पिब	शृणु

(वाक्यानि)

सत्यं वद । अन्नं भुंक्ष्व । जलं पिब ।
पुण्यं कुरु । धर्मं चर । वैरं त्यज ।
गुरुं भज । हितं शृणु । पत्रं लिख ।
शब्दं ब्रूहि । गेहं विश । वेदं पठ ।
दुग्धं पिब । देवं भज । व्रतं कुरु ।

द्वितीयः पाठः ॥ २ ॥

(शब्दाः)

शिरः	मुखं	दन्तः	ओष्ठः
हनुः	कण्ठः	ग्रीवा	घ्राणं
जिव्हा	श्रोत्रं	नेत्रं	शिखा
पक्ष्म	श्मश्रु	पृष्ठं	भुजः
पाणिः	वक्षः	कुक्षिः	कक्षः
नाभिः	कटिः	ऊरुः	जानुः
जंघा	पादः	पार्ष्णिः	नखः

शर्करा	गुडं	नारिकेलं	चोचं
चूतं	पनसं	इक्षुः	जम्बु
खर्जुरं	द्राक्षा	कपित्थं	जम्बीरं
दाडिमं	कूष्मांडः	पटोलः	वृंताकं
तण्डुलाः	यावनालाः	माषाः	तिलाः
गोधूमाः	चणकाः	कुलत्थाः	सर्षपाः
लवणं	मरीचं	कुस्तुंबरु	जीरकः
ताम्बूलं	पूगीफलं	चूर्णं	खदिरः
लवंगं	एला	केशरं	कस्तूरी

(वाक्यानि)

नेत्राभ्यां पश्यामः । कर्णाभ्यां शृणमः ।
घ्राणेन जिघ्रामः । मुखेन भक्षयामः ।
जिव्हया रसं जानीमः। दन्तै श्चर्वामः ।
हस्ताभ्यां कर्माणि कुर्मः। पद्भ्यां चरामः ।
त्वचा स्पर्शं जानीमः । मुखेन वदामः ।

शर्करा मधुरा । मधु मधुरं ।
इक्षुरपि मधुरं । दधि आम्लं ।
लवणं क्षारं । मरिचं कटु ।
कारवेल्लं तिक्तं । आमलकं कषायं ।
सर्वारम्भास्तण्डुलाः प्रस्थमूलाः ।
दधि मधुरं मधु मधुरं द्राक्षा मधुरा सिताऽपिमधुरैव
मधुरादपि तन्मधुरं मथुरानाथस्य नाम यद्गीतम्॥ १॥

तृतीयः पाठः ॥ ३ ॥

(शब्दाः)

अत्र	तत्र	यत्र	कुत्र
यदा	तदा	कदा	सदा
अतः	कुतः	यतः	ततः
इत्थम्	एवम्	कथम्	चिरम्

अथ	इति	यथा	तथा
अधुना	अद्य	ह्यस्	श्वस्
अपि	चेत्	ननु	अहो
यदि	तर्हि	यद्यपि	तथापि
वृथा	वा	पुनर	पुरा
इव	एव	किन्तु	सुष्टु
सायं	प्रातः	दिवा	नक्तम्

माता	पिता	भ्राता	भगिनी
भार्या	पुत्रः	पुत्री	पौत्री
पौत्रः	भर्ता	श्वश्रूः	श्वशुरः
स्नुषा	स्यालः	मातुलः	पितृव्यः
अहं	मम	त्वं	तव
सः	तस्य	अयम्	अस्य

(वाक्यानि)

मम माता । तस्य स्वसा । तव श्वश्रूः ।
मम पिता । तस्य श्यालः । तव श्वशुरः ।
मातुर्भ्राता मातुलः । पितुर्भ्राता पितृव्यः ।
रामस्य भार्या जानकी । श्वशुरो जनकः ।
कृष्णस्य भगिनी सुभद्रा ।

रामस्य माता कौसल्या ।
कृष्णस्य पिता वसुदेवः ।
दशरथस्य स्नुषा जानकी, कुशः पौत्रः ।
अर्जुनस्य श्यालः कृष्णः, वसुदेवः श्वशुरः ।
रामस्य भ्राता लक्ष्मणः तस्य माता सुमित्रा ।

यतः सत्यं ततो धर्मः । यतो धर्मस्ततो धनम् ।
यथा देशस्तथा भाषा । यथा बीजं तथांकुरः ।
यथा भूमिस्तथा तोयम् । यथा चित्तं तथा वाचः
यथा राजा तथा प्रजा । यथा वृक्षस्तथा फलम्
वृथा दानं धनाढ्यस्य । वृथा वृष्टिः समुद्रेषु ।
वृथा दीपो दिवापिच । वृथा तृप्तस्य भोजनम्

चतुर्थः पाठः ॥ ४ ॥

(शब्दाः)

शुक्ल	नील	पीत	रक्त
हरित	कपिल	चित्र	धवल
शुभ्र	हरिण	श्वेत	कृष्ण
धूसर	अरुण	लोहित	पाटल
धूमल	कपिश	शबल	पिशङ्ग

हंसः	बकः	काकः	कोकिलः
शुकः	सारिका	बर्हीं	मयूरः
गरुडः	गृध्रः	शरभः	पतङ्गः
धेनुः	वृषः	अजा	एडकः
महिषी	महिषः	अश्वः	गजः
कपिः	मृगः	व्याघ्रः	सिंहः

(वाक्यानि.)

तूलः शुक्लः (तूलस्य वर्णः शुभ्रः) ।
रौप्यं शुक्लं, दुग्धं दधि तक्रं च शुक्लं ।
हंसा बकाश्चापि शुक्लाः ।
कज्जलं नीलं (कज्जलस्य वर्णः कृष्णः) ।
काकः कृष्णः, पिकः कृष्णः, महिषी कृष्णा ।
हेम पीतं (सुवर्णस्य वर्णः पीतः) ।
हरिद्रा पीता, चंपकः पीतः ।
रुधिरं रक्तं, कुंकुमं जपाकुसुमं च रक्तं ।
वृक्षस्य पर्णानि हरितानि, दूर्वा हरिता ।
शुकोऽपि हारितवर्णः । उष्ट्रः कपिलः ।
बर्हीं चित्रः । धूमो धूसरः । मेघः श्यामः ।

धवला कीर्तिः। अरुणः पाटलः।
माणिक्यं लोहितं।

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः
वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः ॥१॥

पंचमः पाठः ॥ ५ ॥

(शब्दाः)

पुष्पं	बुधः	ब्राह्मणः	आर्यः
बालः	मूर्खः	मार्जारः	दुर्गुणः
शिक्षकः	स्वर्गार्थिन्	गुणः	पूजा
ग्रामः	देशः	मित्रं	रूपं
रक्षति	धावति	पश्यति	ददाति
पृच्छति	पिबति	पठति	त्यजति
शोभन्ति	हसन्ति	वदन्ति	कुर्वन्ति

(वाक्यानि)

माता रक्षति। अश्वो धावति। बालः पश्यति। पुष्पाणि शोभन्ति। मूर्खा हसन्ति। शिक्षकः पृच्छति। मार्जारो दुग्धं पिबति। ब्राह्मणो वेदान् पठति। बुधो दुर्गणं त्यजति। आर्याःसत्यं वदन्ति। स्वर्गार्थिनः पुण्यं कुर्वन्ति। धर्मः सुखं ददाति। मूर्खः मित्रं त्यजति।

विद्या ददाति विनयं
विद्या मित्रं प्रवासेषु
विद्या रूपं कुरूपिणां
विद्या सर्वस्य भूषणं
विद्या स्तब्धस्य निष्फ-
ला । यःक्रियावान् स
पंडितः । हतं ज्ञानं
क्रियाहीनम् ।

सत्यमेव जयते
सत्येन तपते रविः
सत्येन पूयते साक्षी
सत्येन वाति वायुश्च
सत्येन धार्यते पृथ्वी
सर्वं सत्ये प्रतिष्ठितम्
सत्यपूतां वदेद्वाणीम्
सत्यं कण्ठस्य भूषणम्

स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥ १॥
सत्यस्य वचनं श्रेयः सत्यज्ञानं तु दुष्करम्
यद्भूत हितमत्यन्तमेतत्सत्यं ब्रवीम्यहम् ॥२॥

षष्ठः पाठः ॥ ६ ॥

(गृहं ग्रामः देशः पृथ्वी जगच्च ।)

यत्र वयं वसामः क्रीडामः भुञ्ज्मः स्वापिमश्च तद् गृहम्।गृहस्य स्तंभाःस्थूणाश्च वर्तन्ते। तत्र च भोजनगृहं, स्नानगृहं, देवगृहमित्यादीनि अनेकानि उपगृहाणि आसते । सर्वेषां तेषां समुच्चयस्य एकमभिधानं गृहं इति । यत्र

वयं अधीमहे तद् विद्यालयम् । यस्य मार्गस्य पार्श्वयोः ईदृशानि बहूनि गृहाणि आलयानि वा सन्ति, सा वीथ्या इति अभिधीयते । बव्ह्यः वीथ्यः राजगृहाणि मिलित्वा एको ग्रामो भवति । अतीव विस्तृतो ग्रामः पुरी इत्याचक्ष्यते । ईदृशीनां नैक पुरीणां समवायस्तु देशः । एवंच यस्याः पृष्ठभागे अनेकाः देशाः नद्यः गिरयः समुद्रा अपि वर्तन्ते सा पृथ्वी । इत्थं पृथ्व्याकाश सूर्यचंद्रादि ग्रहनक्षत्राणां यः एकः समुदायः तज्जगत् । इदं अखिलं जगत् परमेश्वरेणैव निर्मितम् । तस्मात् तस्य अस्मदुपरि महानयं प्रसादः । ततः सर्वेषां अस्माकं स पिता एव स्यात् । वयं तस्य बालकानि । तस्माद् यदि वयं बंधुत्वेन परस्परसहाय्यं कुर्मः तर्हि एव स ईश्वरः अस्मान् अनुग्रहिष्यति ।

सप्तमः पाठः ॥ ७ ॥

(आर्याणां निवासभूः ।)

यत्र वयं निवसामः तद्देशस्य प्राचीनं नाम ' भारतवर्ष ' ' भरतखण्डं ' वा । संप्रति ' हिंदुस्थान ' इति व्यवऱ्हीयते । एतस्योदीच्यां हिमाचलो नाम जगत्प्रसिद्धो महान् गिरिः । प्राच्यां ब्रह्मदेशः पूर्वसमुद्रश्च । दक्षिणस्यां सिंहलद्वीपं दक्षिणमहासागरश्च । प्रतीच्यामपि तथैव ' आरबी ' नामा समुद्रो वर्तते । इदानीमस्य देशस्य ' कलिकाता ' नाम्नी राजधानी । तथाच मुंबापुरी (मुंबई, बम्बाई) मद्रपुरी (मद्रास) च द्वे विशाले राजनगर्यौ स्तः । अधुना चैनं देशं ईश्वरेच्छया आंग्लभूपाः शासति । एतत्पूर्वं अत्र क्षत्रियाः पश्चात् कतिपय दिनानि म्लेंच्छाश्च राजान आसन् । तदा बत सर्वत्र धर्मग्लानिर्गोब्राह्मणपीडा च बभूव । तदानीमेव ' शिवाजी ' नाम्ना श्रीशिवावतारः प्रादुरभूत् । तेन महाराजेण नृशंसान् यवनान् जित्वा स्वराज्यं स्थापितं स्वधर्मो रक्षि-

तश्च । यदि स चावतारो नाऽभविष्यत् तर्हि ‘ ब्राह्मण्यं ’ ‘ आर्यत्वं ’ वा नास्थास्यत् । तदानीमेव तन्नष्टं स्यात् । परं करुणासागरः प्रभुरेव स्वयमवतीर्य अस्मान् रक्षितवान् ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ १ ॥

भगवद्गीता.

अष्टमः पाठः ॥ ८ ॥

(स्वदेशविस्तारः ।)

भागीरथी, गोदा, यमुना, सरस्वती, नर्मदा, सिंधुः, कावेरी, भीमा, चंद्रभागा, कृष्णा, वेणा, तुंगभद्रा चेत्यादयः सरितः (नद्यः)। एतानि पावनानि तीर्थानि। यतस्तासां स्नानतः पानतःस्मरणतो वा महापातकान्यपि नश्यंति।

हिमाचलः विंध्यः सह्यः नीलगिरिः चंद्रगिरिः श्रीशैलः इत्यादयः प्रसिद्धा गिरयः। ‘ दूरतः पर्वता रम्याः ’ । तदुपरि महांतस्तरव आसते। गुहाश्च सिंह व्याघ्रादिभिःक्रूरैः पशुभिर्व्याप्ताः । कासुचित् गुहासु महात्मानः प्राचीना ऋषयस्तपस्यंतीति। किंवदंती श्रूयते।

वाराणसी (काशी,) गया, प्रयागं, बद्री, अयोध्या, मथुरा, द्वारका, जगन्नाथं, पंढरपुरं, श्रीरंगं, शिवकांची, विष्णुकांची, व्यंकटगिरिः, श्रीमुष्णं, चिदंबरं, मायूरं, रामेश्वरं इत्यादीनि पावनानि क्षेत्राणि । अत्र च प्राचीनानि महान्ति देवालयानि सन्ति । तत्र प्रतिसंवत्सरं नियत दिवसे उत्सवाश्च संभवंति । तदर्थं परस्था जना बहव आयान्ति । सैव 'यात्रा' इत्यभिधीयते ।

नवमः पाठः ॥ ९ ॥

श्रीक्षेत्र पंढरपुरम् ।



समचरणसरोजं सांद्रनीलांबुदाभं
जघननिहितपाणिं मंडनं मंडनानाम् ।
तरुणतुलसिमालाकंधरं कंजनेत्रं
सदयधवलहासं विठ्ठलं चिंतयामि ॥

दक्षिण महाराष्ट्रदेशे 'पंढरी' (पंढरपुरं) नाम महाक्षेत्रं वर्तते । तत् 'भूवैकुंठं' इत्यपि उच्यते । तत्र आषाढे कार्तिके च मासि महती यात्रा मिलति । नवरात्रदीपावल्यादिष्वपि महोत्सवा जायन्ते । अत्रत्या देवता 'श्रीविठ्ठल' नाम्नी । जगदुद्धारार्थं श्रीलक्ष्मीपते र्नवमोऽयमवतारः । एतत्क्षेत्रं तु चंद्रभागानदीतीरस्थम् । कलौ 'नामदेव' 'ज्ञानदेव' (ज्ञानेश्वर) 'तुकाराम' प्रभृतयो दिगंतकीर्तयः साधवः समजायन्त । ते भगवत एव विभूतयः स्युः ।

आसीच्च पुरा मातापितृभक्तः पुंडलीकाभिधः कश्चित्पुरुषः । स सर्वमपि कालं पित्रोः सेवायामेव विनियोजयति स्म । पित्रोस्तस्य एतादृशीमव्यभिचारिणीं भक्तिं दृष्ट्वा भगवान् श्रीमहाविष्णु स्तस्मै वरं दातुं समागतः । पुंडलीको मातापितृसेवानिरतत्वात् भगवतः न किमपि स्वागतं कृतवान् । किंतु समीपस्थामेकां इष्टकां तस्मै आसनार्थमिति क्षि-

ष्ठवान् । तदुपर्येव रुक्मिणीशः प्रेम्णा अतिष्ठत् । स अद्यावधि तथैव वर्तते । श्रीविठ्ठलदेवालयस्य महाद्वारस्य पुरस्तात् पुंडलीकस्यापि आलयं वर्तते । अस्य क्षेत्रस्य माहात्म्यवर्णनं सहस्रमुखेणापि कर्तुमशक्यम् ।

धन्यः खलु असौ मृत्युलोकवासी नरो योऽस्य क्षेत्रस्य दर्शनं लब्ध्वा तत्तोद्भूतं सात्विकानंदमनुभवति ।

बालकैरात्मनो मातापित्रो गुरोश्च सदा एकनिष्ठतया सेवा कर्तव्या । नैव कदाचित्तेषामाज्ञाभंगो विधेयः । बालकैः कृता मातापितृसेवा गुरुशुश्रूषा वा, स्त्रीभिः समाचरिता पतिसेवा गोसेवा वा, सेवकैश्च कृता स्वामिसेवा वा परमेश्वरमेवोपतिष्ठते। तदनुरोधाच्च असौ भगवान् संतुष्टः सन्नखिल सौख्यदाता भवति ।

बालकेभ्यः

बोधाल्हादप्रदाः कथाः ।

कथा प्रथमा १.

गजजंबूकयोः ।

आस्तां कुत्रचिद्गजजंबूकौ । तत्र गजः स्थूलः शृगालः कृशश्च । ज़ंबूकोऽब्रवीत् ' भ्रातः गच्छावस्तावत्पुंड्रेक्षुभक्षणार्थम् । चल । ' जंबूको गतः पुरस्तात् गजोऽतिष्ठत् पश्चात्। अनंतरं काचिन्नदी प्राप्ता। तस्यां पंकः आसीत् । जंबूक उड्डीय गतः । गजस्तु पंके निमग्नः । गजोऽवदत् ' बंधो मामुद्धरस्व रे ' । जंबूक उवाच ' एहि मे पृष्ठतः ' इति । सच हस्ती शरीरस्थूलत्वाद्बहिर्गंतुं नाशक्नोत् । तत्रैव अनाहारेण मृतश्च । जंबूकश्च तं निजपरिवारेण सह भक्षितवान् ।

तात्पर्यम्—नीचमैत्री जगत्यस्मिन् सद्यः प्राणापहारिणी।

कथा द्वितीया २.

आखुशिशोः ।

कस्मिंश्चिद्गृहे बहवः आखवः आसन् । कदाचित् गृहपतिना तद्धननार्थं पंजरो निवेशितः । तत्र च निहितमेकं पोलिकाशकलम् । केनचिदाखुशिशुना तद्दृष्ट्वा स्वमात्रे पृष्टम् ' अंब पश्येदमत्र पोलिकाशकलम् । किंतदद्मि ? ' इति । माता अवदत् ' मा मा । त्वं तत्र निबद्धो भविष्यसि ' इति । स तु निजमातुरिदं वचः असत्यं मत्वा तया अदृष्टः सन् पो-

लिकास्वादनार्थं तत्र गत एव । किंतु तन्मध्ये निबद्धो मृतश्च ।

तात्पर्यम्‒स दुःखभाग्भवेद्यो वै पित्रोर्वाक्यं न मानयेत् ।

कथा तृतीया ३.

शशकच्छपयोः ।

आसीदेकः शशः एकश्च कच्छपः । उभौ तौ एकदा नगरांतरार्थं प्रस्थितौ । शशोऽवदत् ‘ त्वत्तः पूर्वमेव अहं तत्र प्राप्स्यामि ’ । कच्छपो बभाषे ‘ अहमेव ’ इति । शशस्य गमनं शीघ्रगत्या, कच्छपस्य तु मंदमेव । यावच्छशो दूरं गत्वा पृष्ठभागे पश्यति, तावत्कूर्मः अतीव पश्चात् वर्तते । ततः ‘ आः निद्रासुखमनुभवामि किंचित्, यावत्स अत्रागामिष्यति ’ इत्युक्त्वा स तत्रैव गाढं सुष्वाप। मंथरगतिः कूर्मस्तु पश्चादागत्य तूर्णमेव संकेतस्थानं प्राप्तः ।

तात्पर्यम्‒शनैः कार्यकरस्यैव कृतोद्योगः समाप्यते ।

कथा चतुर्थी ४.

मित्रद्वयस्य ।

उभौ आस्तां सुहृदौ । ताभ्यामेकदा अटव्यटनसमये कश्चित् ऋक्षो दृष्टः । तयोरेकतमः वृक्षमारुह्य प्रच्छन्नो बभूव । अपरस्तु अचेतनत्वमप-

दिशन् भूमावेव तूष्णीमशेत । ऋक्ष स्तत्समीपमागतवान् । किंतु मृतोऽयमिति मत्वा स तच्छरीरं सर्वत आघ्रायैव निवृत्तः । तदुपरि वृक्षस्थः सुहृद् अधोऽवतीर्य तं पृष्टवान् ‘ सखे किं कथितं कर्णे ऋक्षेण ’ इति । सोऽप्यवदत् ‘ केवलं त्वादृशैर्वंचकैः सह संगति र्न कार्या इत्येव ’ इति ।

तात्पर्य– परीक्ष्य संगतिः कार्या सदैव भूतिमिच्छता ।

कथा पंचमी ५.

शूद्रीनकुलयोः ।

अस्ति स्म काचिच्छूद्री तंतुपुर्याम् । तया च एको नकुलः स्वापत्यनिर्विशेषं संवर्तितः आसीत् । कदाचिन्निजबालकमांदोले शाययित्वा निधाय च तत्समीपे तं नकुलं सा उदकानयनार्थं बहिर्गता । अत्रांतरे तत्र कश्चित्सर्प आगतः। स च यावत्तं बालकं दष्टुमुद्यतो भवति तावत्समीपस्थेन नकुलेनैषः खंडशः कृत्वा व्यापादितः । किंतु प्रतिनिवृत्ता सा शूद्री तस्य मुखं रुधिराभिषिक्तं दृष्ट्वा मम बालकमेवानेन व्यापादितं स्यादिति मत्वा सक्रोधं तस्योपरि जलकुंभाधिक्षेपं कृत्वा निरपराधिनं तं नष्टजीवितं चकार । ज्ञाते त्वखिलवृत्तेसा स्वाविवेकार्थं पश्चात्तापं भेजे ।

तात्पर्यम् – सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।

कथा षष्ठी ६.

सिंहवृषभाणाम् ।

कस्मिंश्चिदरण्ये एकः सिंहश्चत्वारो वृषभाश्चासन् । सिंहस्तु सर्वदा तान्व्यापादयितुं ऐच्छत् । ते तु परस्पर विहाय न कदापि स्वैराचरणं कुर्वन्ति । ततः सिंहः एकदा तेषु एकतमं वृषभं रहस्युवाच । ' भो मित्र स उन्नतशृंगो वृषभः किमिति त्वां नित्यं शपति त्वत्परोक्षम् । हन्तुमपि इच्छति त्वाम् ' इति । सिंहस्येदं वचः सत्यमिति मत्वा तदारभ्य स वृषभः स्वेषां मध्ये अगत्वा पृथगेव वसतिं कुर्वाण आसीत् । अनया रीत्या स सिंहः सर्वेष्वपि वृषभेषु परस्पर वैरमुत्पादयित्वा तान् एकैकशः व्यापादितवान् ।

तात्पर्यम् – संहतिः श्रेयसी पुंसाम् ।

बोधप्रद वाक्यानि ।

गुरूणां सन्निधौ तिष्ठेत् सदैव विनयान्वितः ।
कृतेच प्रतिकर्तव्य मेष धर्मः सनातनः ।
क्षणशः कणशश्चैव विद्यामर्थंच साधयेत् ।
यद्यदात्मनि चेच्छेत्तु तत्परस्यापि चिंतयेत् ।
प्रियं तथ्यं च पथ्यं च वदेद्धर्मार्थकं वचः ।
विद्वान् सर्वेषु भूतेषु ह्यात्मना सोपमो भवेत् ।
सज्जनैः संगतं कुर्यात् धर्माय च सुखाय च ।
शुष्कवैरं विवादं च न कुर्यात् केनचित्सह ।

परोपकारः पुण्याय पापाय परपीडनम् ।
स्वजनैर्न विरुद्ध्येत न स्पर्धेत बलीयसा ।
सा श्री र्या न मदं कुर्यात् स सुखी तृष्णयोज्झितः ।
स सुहृद् व्यसने यः स्यात् स पुत्रो यस्तु भक्तिमान् ।

विभक्तिनिदर्शनम् ।

रामो हरिः करी भूभृद्भानुः कर्ता च चन्द्रमाः ॥
तस्थिवान् भगवानात्मा दर्शते पुंसि नायकाः॥१॥

अकारान्तः पुँल्लिङ्गो ' राम ' शब्दः ।

	एकवचनम् ।	द्विवचनम् ।	बहुवचनम् ।	
१	रामः	रामौ	रामाः	(प्रथमा)
२	रामम्	रामौ	रामान्	(द्वितिया)
३	रामेण	रामाभ्याम्	रामैः	(तृतिया)
४	रामाय	रामाभ्याम्	रामेभ्यः	(चतुर्थी)
५	रामात्	रामाभ्याम्	रामेभ्यः	(पंचमी)
६	रामस्य	रामयोः	रामाणाम्	(षष्ठी)
७	रामे	रामयोः	रामेषु	(सप्तमी)
हे	राम	रामौ	रामाः	(संबोधनं)

एवं देवकृष्णमुकुंदादयोऽकारान्त पुँलिङ्गाः ।

[१]रामो राजमणिः सदा विजयते [२]रामं रमेशं भजे ।
[३]रामेणाभिहता निशाचरचमू [४]रामाय तस्मै नमः ॥
[५]रामान्नास्ति परायणं परतरं [६]रामस्य दासोऽस्म्यहम् ।
[७]रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥१॥

यल्लिङ्गं यद्वचनं या च विभक्ति र्विशेष्यस्य ॥
तल्लिङ्गं तद्वचनं सा च विभक्ति र्विशेषणस्यापि॥१॥

संख्यालक्षणानि ।

(आर्यावृत्तं)

एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः ॥
अर्बुदमब्जखर्वनिखर्वमहापद्मशंकवस्तस्मात् ॥ १ ॥
जलधिचांत्यं मध्यं परार्धमिति दशगुणोत्तराः संज्ञाः ॥
संख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैः ॥ २ ॥

स्थानानि.

१	एकं	१
२	दशं	१०
३	शतं	१००
४	सहस्रं	१०००
५	अयुतं(दशसहस्र)	१००००
६	लक्षं	१०००००
७	प्रयुतं(दशलक्ष)	१००००००
८	कोटिः	१०००००००
९	अर्बुदं(दशकोटि)	१००००००००
१०	अब्जं	१०००००००००
११	खर्वं	१००००००००००
१२	निखर्वं	१०००००००००००
१३	महापद्मं	१००००००००००००
१४	शंकुः	१०००००००००००००
१५	जलधिः	१००००००००००००००
१६	अंत्यं	१०००००००००००००००
१७	मध्यं	१००००००००००००००००
१८	परार्धं	१०००००००००००००००००

संख्यावाचक शब्दाः

	पुल्लिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे
१	एकः	एका	एकम्
२	द्वौ	द्वे	द्वे
३	त्रयः	तिस्रः	त्रीणि
४	चत्वारः	चतस्रः	चत्वारि

५ पञ्च	२४ चतुर्विंशतिः	४३ त्रिचत्वारिंशत्.
६ षट्	२५ पंचविंशतिः	४४ चतुश्चत्वारिंशत्
७ सप्त	२६ षड्विंशतिः	४५ पंचचत्वारिंशत्
८ अष्ट	२७ सप्तविंशतिः	४६ षट्चत्वारिंशत्
९ नव	२८ अष्टाविंशतिः	४७ सप्तचत्वारिंशत्
१० दश	२९ एकोनविंशतिः	४८ अष्टचत्वारिंश.
११ एकादश	३० त्रिंशत्	४९ एकोनपंचाशत्
१२ द्वादश	३१ एकत्रिंशत्	५० पंचाशत्
१३ त्रयोदश	३२ द्वात्रिंशत्	५१ एकपंचाशत्
१४ चतुर्दश	३३ त्रयस्त्रिंशत्	५२ द्विपंचाशत्
१५ पंचदश	३४ चतुस्त्रिंशत	५३ त्रिपंचाशत्
१६ षोडश	३५ पंचात्रिंशत्	५४ चतुःपंचाशत्
१७ सप्तदश	३६ षट्त्रिंशत्	५५ पंचपंचाशत्
१८ अष्टादश	३७ सप्तत्रिंशत्	५६ षट्पंचाशत्
१९ एकोनविंशतिः	३८ अष्टत्रिंशत्	५७ सप्तपंचाशत्
२० विंशतिः	३९ एकोनचत्वारिं.	५८ अष्टपंचाशत्
२१ एकविंशतिः	४० चत्वारिंशत्	५९ एकोनषष्ठिः
२२ द्वाविंशतिः	४१ एकचत्वारिंश.	६० षष्ठिः
२३ त्रयोविंशतिः	४२ द्विचत्वारिंशत्	६१ एकषष्ठिः

६२द्विषष्ठिः	७६षट्सप्ततिः	९०नवतिः
६३त्रिषष्ठिः	७७सप्तसप्ततिः	९१एकनवतिः
६४चतुष्षष्ठिः	७८अष्टसप्ततिः	९२द्विनवतिः
६५पंचषष्ठिः	७९एकोनाशीतिः	९३त्रिनवतिः
६६षट्षष्ठिः	८०अशीतिः	९४चतुर्णवतिः
६७सप्तषष्ठिः	८१एकाशीतिः	९५पंचनवतिः
६८अष्टषष्टिः	८२द्व्यशीतिः	९६षण्णवतिः
६९एकोनसप्ततिः	८३त्र्यशीतिः	९७सप्तनवतिः
७०सप्ततिः	८४चतुरशीतिः	९८अष्टनवतिः
७१एकसप्ततिः	८५पंचाशीतिः	९९एकोनशतम्
७२द्विसप्ततिः	८६षडशीतिः	१००शतम्
७३त्रिसप्ततिः	८७सप्ताशीतिः	१०१एकोत्तरशतं
७४चतुःसप्ततिः	८८अष्टाशीतिः	१०८अष्टोत्तरशतं.
७५पंचसप्ततिः	८९एकोननवतिः	इत्यादि.

कल्यब्दाः ४९९८

शालिवाहन शकाब्दाः १८१९

विक्रमसंवत् १९५३।५४

ह्रूणवत्सरः १८९७।९८

अंकानां वामतो गतिः।

१७७६३९=नवत्रिंशदधिकषट्शताधिकसप्तसप्तति-
सहस्राधिकलक्षम्।

७५४=चतुःपंचाशदधिकसप्तशतम्।

८३०=त्रिंशदधिकाष्टशतम्।

१८१९=एकोनविंशदधिकाष्टशताधिकसहस्रम्।
१८९८=अष्टनवत्यधिकाष्टशताधिकसहस्रम् ।

(क्रमवाचकाः)

	पु०	स्त्री०	नपुं०
(१)	प्रथमः	प्रथमा	प्रथमम्
(२)	द्वितीयः	द्वितीया	द्वितीयम्
(३)	तृतीयः	तृतीया	तृतीयम्
(४)	चतुर्थः	चतुर्थी	चतुर्थम्
	तुरीयः	तुरीया	तुरीयम्
(५)	पंचमः	पंचमी	पंचमम्
(६)	षष्ठः	षष्ठी	षष्ठम्
(७)	सप्तमः	सप्तमी	सप्तमम्
(८)	अष्टमः	अष्टमी	अष्टमम्
(९)	नवमः	नवमी	नवमम्
(१०)	दशमः	दशमी	दशमम्

(१५)	पंचदश	(५०)	पंचाशत्तम
(२०)	विंशतितम	(६०)	षष्ठितम
(२५)	पंचविंशतितम	(७०)	सप्ततितम
(३०)	त्रिंशत्तम	(८०)	अशीतितम
(३५)	पंचत्रिंशत्तम	(९०)	नवतितम
(४०)	चत्वारिंशत्तम	(१००)	शततम
(४५)	पंचचत्वारिंश०	(१०००)	सहस्रतम

अथ नित्योपयुक्त संग्रहः ।

६० संवत्सर नामानि.

प्रभवो विभवः शुक्लः प्रमोदोथ प्रजापतिः ॥ अंगिराः श्रीमुखो भावो युवा धाता तथैवच ॥ १ ॥ ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ॥ चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ॥ २ ॥ सर्वजित् सर्वधारी च विरोधी विकृतिः खरः ॥ नंदनो विजयश्चैव जयो मन्मथदुर्मखौ ॥ ३ ॥ हेमलंबो विलंबीच विकारी शार्वरी प्लवः ॥ शुभकृच्छोभनः क्रोधी विश्वावसु पराभवौ ॥ ४ ॥ प्लवंगः कीलकः सौम्यः साधारण विरोधकृत ॥ परिधावी प्रमादीच आनंदो राक्षसो नलः ॥ ५ ॥ पिंगलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ॥ दुंदुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः ॥ ६ ॥

---

१ प्रभव, २ विभव, ३ शुक्ल, ४ प्रमोद, ५ प्रजापति ६ अंगिरा, ७ श्रीमुख, ८ भाव, ९ युव, १० धात, ११ ईश्वर १२ बहुधान्य, १३ प्रमाथी, १४ विक्रम, १५ वृष, १६ चित्रभानु, १७ सुभानु, १८ तारण, १९ पार्थिव, २० व्यय, २१ सार्वजित्, २२ सर्वधारी, २३ विरोधी, २४ विकृति, २५ खर, २६ नंदन, २७ विजय, २८ जय, २९ मन्मथ, ३० दुर्मुख, ३१ हेमलंब, ३२ विलंब, ६३ विकारी, ३४ शार्वरी, ३५ प्लव, ३६ शुभकृत्, ३७ शोभन, ३८ क्रोधी, ३९ विश्वावसु, ४० पराभव, ४१ प्लवंग, ४२ कीलक, ४३ सौम्य, ४४ साधारण, ४५ विरोधकृत्, ४६ परिधावी, ४७ प्रमादी, ४८ आनंद, ४९ राक्षस, ५० नल, ५१ पिंगल, ५२ कालयुक्त, ५३ सिद्धार्थ, ५४ रौद्र, ५५ दुर्मति, ५६ दुंदुभि, ५७ रुधिरोद्गारी, ५८ रक्ताक्षी, ५९ क्रोधन, ६० क्षय.

अयने द्वे २.

१ उदगयनं (उत्तरायणम्) २ दक्षिणायन

मासा द्वादश (१२).–१ चैत्र, २ वैशा
३ ज्येष्ठ, ४ आषाढ, ५ श्रावण, ६ भाद्रपद,
आश्विन, ८ कार्तिक, ९ मार्गशीर्ष, १० पौष,
माघ, १२ फाल्गुन.

ऋतवः षट् (६).–१ वसंत, २ ग्रीष्म, ३
४ शरद्, ५ हेमंत, ६ शिशिर.

१ चैत्रवैशाखौ वसंतऋतुः । २ ज्येष्ठाषाढौ ग्रीष्
ऋतुः । ३ श्रावणभाद्रपदौ वर्षाऋतुः । ४ आश्वि
कार्तिकौ शरदृतुः । ५ मार्गशीर्षपौषौ हेमंतऋतुः
६ माघफाल्गुनौ शिशिरऋतुः ।

पक्षौ द्वौ–शुक्लकृष्णौ. प्रतिपत्पौर्णिमान्तः शु
पक्षः । तदनंतरं अमावास्यान्तः कृष्णपक्षः ।

तिथयस्त्रिंशत् (३०)

१ प्रतिपत्, २ द्वितीया, ३ तृतीया, ४ चतु
५ पंचमी, ६ षष्ठी, ७ सप्तमी, ८ अष्टमी, ९ नव
१० दशमी, ११ एकादशी, १२ द्वादशी, १३ त्रयो-
दशी १४ चतुर्दशी, १५ पौर्णिमा, १–३० अमावास्या.

वाराः सप्त (७).

(१ आदित्य (रविः) २ सोम (इन्दुः) म

त

१२
भा
स

५४
का